# द्वितीयसमाकलनपरीक्षा, 2018-19

## संस्कृतम्

**अवधिः - होरात्रयम्** **कक्षा - षष्ठी** **पूर्णांकाः - अशीतिः**

**दिनांकः - 19.09.2018 (बुधवासरः)**

**विद्यार्थिनः नाम** ............................................................................................................... **वर्गः** ...........

**निर्देशाः -**

- **सर्वे प्रश्नाः अनिवार्याः सन्ति ।**
- **प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि ।**
- **प्रश्नपत्र चतुर्भागेषु विभक्तमस्ति अतः भागानाम् उल्लेखः करणीयः ।**

## खण्डः क (अपठितावबोधनम् - 05 अंकाः)

प्र-1 **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

एकः काकः अस्ति । सः पिपासितः अस्ति । सः इतस्ततः भ्रमति परन्तु कुत्रापि जलं न पश्यति । अन्ते सः उद्याने घटं पश्यति । घटे स्वल्पं जलम् अस्ति । सः प्रयत्नं करोति । सः जलस्य पाने सफलः न भवति । ततः सः पाषाणस्य खण्डानि घटे क्षिपति । जलं च एवं घटस्य कण्ठे आगच्छति । सः पर्याप्तं जलं पिबति ।

**क) एकपदेन उत्तरत -** **(1×2=2)**

अ) पिपासितः कः अस्ति ?

ब) सः पाषाणस्य खण्डानि कुत्र क्षिपति ?

**ख) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

अ) काकः उद्याने किं पश्यति ?

ब) काकः कस्य खण्डानि घटे क्षिपति ?

**ग) निर्देशानुसारं उत्तरत -** **(½×2=1)**

अ) 'सः इतस्ततः भ्रमति ।' इति वाक्ये अव्ययः कः ?

अ) इतस्ततः ब) भ्रमति स) सः

ब) 'पाषाणस्य' इति पदस्य अर्थः कः ?

अ) पानी का ब) पत्थर का स) टुकड़े का

## खण्ड - ख (रचनात्मककार्यम् - 15 अंकाः)

प्र-2 **अधोलिखितं वार्तालापं मञ्जूषातः पदं चित्वा पूरयत -** **(1×5=5)**

**मञ्जूषा -** **किम्, मम, कुत्र, अस्मि, गच्छामि**

समयः- भो ! अहम् समयः (१).................। तव नाम (२).............अस्ति ?

श्रेयः - (३).................नाम श्रेयः अस्ति ।

समयः- भवान् (४)................गच्छति ?

श्रेयः - अहम् तु गृहम् (५)................।

i:-3 **चित्रं दृष्ट्वा मञ्जूषायाः शब्दानां सहायतया पञ्च संस्कृतवाक्यानि लिखत –** **(2x5=10)**

**मञ्जूषा –**

| |
|---|
| **तडागस्य, मीनाः, तडागे, चित्रम्, तरन्ति, कच्छपः, वर्तकाः, मीनम्, खादति, कमलानि, अस्ति, विकसन्ति, बकः, एतत् ।** |



## खण्ड – ग (अनुप्रयुक्तव्याकरणम् – 20 अंकाः)

i:-4 **वर्णसंयोजनं / विच्छेदं वा कुरुत –** **(1×4=4)**

क) व् + इ + द् + य् + आ + ल् + अ + य् + अः = ..........................।

ख) न् + आ + र् + ई = ..........................।

ग) च् + अ + क् + ............ + अ + म् = चक्रम् ।

घ) म् + ........... + ष् + अ + क् + अः = मूषकः ।

i:-5 **अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत –** **(1×4=4)**

क) वह दौड़ता है । ख) वे सब पढ़ती हैं ।

ग) मैं खेलता हूँ । घ) लता लिखती है ।

i:-6 **शब्दरूपाणि लिखत –** **(½×6=3)**

| **विभक्ति** | **एकवचन** | **द्विवचन** | **बहुवचन** |
|---|---|---|---|
| प्रथमा – | माला | (1).......... | मालाः |
| द्वितीया – | (2).......... | माले | मालाः |
| तृतीया – | जलेन | जलाभ्याम् | (3).......... |
| चतुर्थी – | (4)........... | रमाभ्याम् | रमाभ्यः |
| पञ्चमी – | (5)........... | वृक्षाभ्याम् | वृक्षेभ्यः |
| षष्ठी – | फलस्य | फलयोः | फलानाम् |
| सप्तमी – | गृहे | (6)......... | गृहेषु |

i:-7 **धातुरूपाणि लिखत -** **(½×6=3)**

| पुरुषः | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथम - | (1)........... | (2)............. | पतन्ति |
| मध्यम - | (3)........... | हसथः | (4)......... |
| उत्तम - | (5)........... | खेलावः | (6)........... |

i:-8 **अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत -** **(½×6=3)**

**तदा, यथा, मिथ्या, कदा, अधः, च**

क) सः..................गच्छति ?

ख) .................राजा तथा प्रजा ।

ग) यदा बालकः हसति................. जनकः हसति ।

घ) जनकः तु कदापि ................. न वदति ।

ङ) रामः सीता................. गच्छतः ।

च) जलम्................. गच्छति ।

i:-9 **अधोलिखितवाक्यानि शुद्धं कुरुत -** **(1×3=3)**

क) अश्वाः तीव्रम् **धावसि** ।

अ) धावन्ति  ब) धावति  स) धावमि

ख) त्वं **पचन्ति** ।

अ) पचति  ब) पचसि  स) पचतः

ग) ते लते तत्र न **पठन्ति** ।

अ) पठति  ब) पठसि  स) पठतः

## खण्ड - घ (पठितावबोधनम् - 40 अंकाः)

i:-10 **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

वने शृगालः बकः च निवसतः स्म । तयोः मित्रता आसीत् । एकदा प्रातः शृगालः बकम् अवदत् - "मित्र ! श्वः त्वं मया सह भोजनं कुरु ।" शृगालस्य निमन्त्रणेन बकः प्रसन्नः अभवत् । अग्रिमे दिने बकः भोजनाय शृगालस्य निवासम् अगच्छत् ।

1½ **एकपदेन उत्तरत -** **(½×4=2)**

अ) शृगालस्य मित्रं कः आसीत् ?

ब) कुत्र शृगालः बकः च निवसतः स्म ?

स) कस्य निमन्त्रणेन बकः प्रसन्नः अभवत् ?

द) कदा बकः भोजनाय शृगालस्य निवासम् अगच्छत् ?

2½ **पूर्णवाक्येन उत्तरत -** **(1×2=2)**

अ) एकदा प्रातः शृगालः बकं किम् अवदत् ?

ब) बकः भोजनाय कस्य निवासम् अगच्छत् ?

3½ **निर्देशानुसारं उत्तरत –** **(½×2=1)**

अ) 'शत्रुता' इति पदस्य अत्र किं विलोमपदम् अस्ति ?

क) मित्रता ख) एकदा ग) तयोः

ब) अव्ययपदं चित्वा लिखत ।

क) शृगालः ख) भोजनाय ग) च

i-11 **अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –**

वने वने निवसन्तो वृक्षाः । वनं वनं रचयन्ति वृक्षाः ।।1।।

शाखादोलासीना विहगाः । तैः किमपि कूजन्ति वृक्षाः ।।2।।

पिबन्ति पवनं जलं सन्ततम् । साधुजना इव सर्वे वृक्षाः ।।3।।

स्पृशन्ति पादैः पातालं च । नभः शिरस्सु वहन्ति वृक्षाः ।।4।।

1½ **एकपदेन उत्तरत –** **(1×2=2)**

अ) वने वने के निवसन्ति ?

ब) वृक्षाः किम् रचयन्ति ?

2½ **पूर्णवाक्येन उत्तरत –** **(1×2=2)**

अ) के सर्वे साधुजनाः इव सन्ति ?

ब) वृक्षाः कैः पातालं स्पृशन्ति ?

3½ **निर्देशानुसारं उत्तरत –** **(½×2=1)**

अ) 'खादन्ति' इति पदस्य अत्र किं विलोमपदम् अस्ति ?

क) पिबन्ति ख) वहन्ति ग) स्पृशन्ति

ब) 'पादैः' इति पदे का विभक्तिः अस्ति ?

क) तृतीया ख) षष्ठी ग) पंचमी

i-12 **अधोलिखितानां प्रश्नानामुत्तराणि लिखत –** **(2×5=10)**

क) जनाः कुत्र स्वैरं विहरन्ति ? ख) भारतस्य दीर्घतमः समुद्रतटः कः ?

ग) कौतुकेन वृक्षाः किं पश्यन्ति ? घ) शृगालस्य स्वभावः कीदृशः भवति ?

ड.) कोच्चितटः केभ्यः ज्ञायते ?

i-13 **उचितां विभक्तिं प्रयुज्य वाक्यानि रचयत –** **(1×4=4)**

क) अहमपि......................खेलामि । (कन्दुक)

ख) आवाम् ...................... गच्छावः । (जन्तुशाला)

ग) ......................चरतः । (अजा)

घ) मृगाः ..................सह चरन्ति । (मृग)

i-14 **मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –** **(1×4=4)**

**मञ्जूषा –**

| **अद्य, प्रातः, अस्माकम्, प्रायद्वीपः ।** |
|---|

क) ..................भ्रमणं स्वास्थ्याय भवति ।

ख) ..................रविवासरः अस्ति ।

ग) भारतदेशः .................. इति कथ्यते ।

घ) भारतम्..................देशः ।

i-15 **मञ्जूषातः कर्तृपदं चित्वा रिक्तस्थानानि पूरयत –** **(1×4=4)**

**मञ्जूषा –**

| **सिंहाः, सूचिका, पुष्पमालाः, अजे ।** |
|---|

क) .................सन्ति ।

ख) .................अस्ति ।

ग) .................चरतः ।

घ) .................गर्जन्ति ।

i-16 **मञ्जूषातः क्रियापदं चित्वा रिक्तस्थानानि पूरयत –** **(1×4=4)**

**मञ्जूषा –**

| **गर्जतः, खादति, पश्यन्ति, नृत्यति ।** |
|---|

क) वानरः..................।

ख) सौम्या ..................।

ग) सिहौ ..................।

घ) जनाः ..................।

i-17 **निर्देशानुसारं वचनपरिवर्तनम् कुरुत –** **(1×4=4)**

क) मयूरः नृत्यति । (बहुवचने) ............... ...............

ख) एतानि यानानि। (एकवचने) ............... ...............

ग) छात्रे लिखतः । (बहुवचने) ............... ...............

घ) एतानि पतन्ति । (द्विवचने) ............... ...............